विचरिष्यति । अर्ज्जुन उवाच । गाण्डीवमाश्रयं
कृत्वा नाराचांश्चाग्निसन्निभान् । निवसामि महारण्ये
द्वितीय इव पावकः । एष चापि महाजन्तुर्म्मृगरूपं
समाश्रितः । राक्षसो निहतो घोरो हन्तुं मामिह
चागतः । किरात उवाच । मयैष धनुर्निर्म्मुक्तैस्ता-
ड़ितः पूर्व्वमेव हि । बाणैरभिहतः शेते नीतश्च यमसा-
दनम् । ममैष लक्ष्यभूतो हि मम पूर्व्वपरिग्रहः । ममैव
च प्रहारेण जीविताद्व्यपरोपितः । दोषान् स्वान्नार्ह-
सेऽन्यस्मै वक्तुं स्वबलदर्पितः । अवलिप्तोऽसि मन्दात्मन् !
न मे जीवन् विमोक्ष्यसे । स्थिरो भवस्व मोक्ष्यामि
सायकानशनीरिव । घटस्व परया शक्त्या मुञ्च त्वमपि
सायकान् । तस्य तद्वचनं श्रुत्वा किरातस्यार्ज्जुनस्तदा ।
रोषमाहारयामास ताड़यामास चेषुभिः । ततो हृष्टेन
मनसा प्रतिजग्राह सायकान् । भूयोभूय इति प्राह
मन्दमन्देत्युवाच ह । प्रहरस्व शरानेतान्नाराचान्म-
र्म्मभेदिनः । इत्युक्तो बाणवर्षं स मुमोच सहसाऽ-
र्ज्जुनः । ततस्तौ तत्र संरब्धौ राजमानौ मुहुर्म्मुहुः ।
शरैराशीविषाकारैस्ततक्षाते परस्परम् । ततोऽर्ज्जुनः
शरवर्षं किराते समवासृजत् । तत्प्रसन्नेन मनसा प्रति-
जग्राह शङ्करः । मुहूर्त्तं शरवर्षं तत् प्रतिगृह्य पिना-
कधृक् । अक्षतेन शरीरेण तस्थौ गिरिरिवाचलः ।
स दृष्ट्वा बाणवर्षन्तु मोघीभूतं धनञ्जयः । परमं विस्म-
यञ्चक्रे साधु साध्विति चाब्रवीत् । अहोऽयं सुकुमा-
राङ्गो हिमवच्छिखराश्रयः । गाण्डीवमुक्तान्नाराचान्
प्रतिगृह्णात्यविह्वलः । कोऽयं देवो भवेत् साक्षात् रुद्रो
यक्षः सुरोऽसुरः । विद्यते हि गिरिश्रेष्ठे त्रिदशानां
समागमः । नहि मद्बाणजालानामुत्सृष्टानां सहस्रशः ।
शक्तोऽन्यः सहितुं वेगमृते देवं पिनाकिनम् । देवो
वा यदि वा यक्षो रुद्रादन्यो व्यवस्थितः । अहमेनं
शरैस्तीक्ष्णैर्नयामि यमसादनम् । ततो हृष्टमना
जिष्णुर्नाराचान्मर्म्मभेदिनः । व्यसृजच्छतधा राजन् !
मयूखानिव भास्करः । तान् प्रसन्नेन मनसा भगवान्
लोकभावनः । शूलपाणिः प्रत्यगृह्णाच्छिलावर्षमिवाचलः ।
क्षणेन क्षीणबाणोऽथ संवृत्तः फाल्गुनस्तदा । भीश्चैन-
माविशत्तीव्रा तं दृष्ट्वा शरसंक्षयम् । चिन्तयामास जि-
ष्णुस्तु भगवन्तं हुताशनम् । पुरस्तादक्षयौ दत्तौ तूणौ
येनास्य खाण्डवे । किं नु मोक्ष्यामि धनुषा यन्मे बाणाः
क्षयं गताः । अयञ्च पुरुषः कोऽपि बाणान् ग्रसति
सर्व्वशः । हत्वा चैनं धनुष्कोट्या शूलाग्रेणेव कुञ्जरम् ।
नयामि दण्डधारस्य यमस्य सदनं प्रति । प्रगृह्याथ
धनुष्कोट्या ज्यापाशेनावकृष्य च । मुष्टिभिश्चापि हत-
वान् वज्रकल्पैर्म्महाद्युतिः । संप्रयुद्धो धनुष्कोट्या कौ-
न्तेयः परवीरहा । तदप्यस्य धनुर्द्दिव्यं जग्राह गिरि-
गोचरः । ततोऽर्ज्जुनो ग्रस्तधनुः खड्गपाणिरतिष्ठत ।
युद्धस्यान्तमभीप्सन् वै वेगेनाभिजगाम तम् । तस्य
मूर्द्ध्नि शितं खड्गमसक्तं पर्व्वतेष्वपि । मुमोच भुजवी-
र्य्येण विक्रम्य कुरुनन्दनः । तस्य मूर्द्धानमासाद्य पफा-
लासिवरो हि सः । ततो वृक्षैः शिलाभिश्च योधयामास
फाल्गुनः । तदा वृक्षान्महाकायः प्रत्यगृह्णादथो
शिलाः । किरातरूपो भगवांस्ततः पार्थो महाबलः ।
मुष्टिभिर्व्वज्रसङ्काशैर्धूममुत्पादयन् मुखे । प्रजहार दु-
राधर्षे किरातसमरूपिणि । ततः शक्राशनिसमैर्म्मुष्टिभि-
र्भृशदारुणैः । किरातरूपी भगवानर्द्दयामास पाण्डवम् ।
ततश्चटचटाशब्दः सुघोरः समपद्यत । पाण्डवस्य च
मुष्टीनां किरातस्य च युध्यतः । सुमुहूर्त्तन्तु तद्युद्धम-
भवल्लोमहर्षणम् । भुजप्रहारसंयुक्तं वृत्रवासवयोरिव ।
जघानाथ ततो जिष्णुः किरातमुरसा बली । पाण्डवञ्च
विचेष्टन्तं किरातोऽप्यहनद्बली । तयोर्भुजविनिष्पेषात्
सङ्घर्षेणोरसोस्तथा । समजायत गात्रेषु पावकोऽङ्गा-
रधूमवान् । तत एनं महादेवः पीड्य गात्रैः सुपीड़ि-
तम् । तेजसा व्याक्रमद्रोषाच्चेतस्तस्य विमोहयन् ।
ततोऽभिपीड़ितैर्गात्रैः पिण्डीकृत इवाबभौ । फाल्गुनो
गात्रसंरुद्धो देवदेवेन भारत ! । निरुच्छ्वासोऽभवच्चैव
सन्निरुद्धो महात्मना । पपात भूम्यां निश्चेष्टो गतसत्त्व
इवाभवत् । स मुहूर्त्तन्तथा भूत्वा सचेताः पुनरुत्थितः ।
रुधिरेणाप्लुताङ्गस्तु पाण्डवो भृशदुःखितः । शरण्यं
शरणं गत्वा भगवन्तं पिनाकिनम् । मृण्मयं स्थण्डिलं
कृत्वा माल्येनापूजयद्भवम् । तच्च माल्यं तदा पार्थः
किरातशिरसि स्थितम् । अपश्यत् पाण्डवश्रेष्ठो
हर्षेण प्रकृतिङ्गतः । पपात पादयोस्तस्य ततः प्रीतोऽ-
भवद्भवः । उवाच चैनं वचसा मेघगम्भीरगीर्हरः ।
ज्ञातविस्मयमालोक्य तपःक्षीणाङ्गसंहतिम् । भव उवाच ।
भो भो फाल्गुन ! तुष्टोऽस्मि कर्म्मणाऽप्रतिमेन ते ।
शौर्य्येणानेन धृत्या च क्षत्त्रियो नास्ति ते समः । समं
तेजश्च वीर्य्यञ्च ममाद्य तव चानघ । प्रीतस्ते ऽहं महा-
बाहो ! पश्य मां भरतर्षभ ! । ददामि ते विशालाक्ष !